G.S-10

॥ श्रुतिविज्ञानम् ॥

**Sri. Vasudeva Paranjape,
745, Vaibhavam, 4th Main, 24th Cross,
Vidyaranyapuram, Mysore-570 008**

बृहस्पते प्रथमं वाचो अग्रं यत्प्रैरत नामधेयं दधानाः ।
यदेषां श्रेष्ठं यदरिप्रमासीत् प्रेणा दतेषां निहितं गुहाविः ॥

विज्ञातं हि सर्वेषां वेदाः अस्माकं वैदिक मतानुयायिनां जीवस्थानं भजन्ते । जन्मनःप्रभृति मरणपर्यन्तं ये ये संस्काराः अभ्युदय नैःश्रेयसिकव्यवहाराश्च वेदेनैव उपजीव्य वर्तन्ते । अद्यतनेऽपि काले धर्मप्रधानानाम् आर्याणां वेदाः एव प्रमाण भूताः सन्ति । अत एव सनातनैः आर्यैः महता प्रयत्नेन कण्ठस्थीकृत्य सुरक्षिताः वेदाः । अतः तेषु कुत्रापि स्वरमात्रावर्णविपर्यासो नोपलभ्यते ।

अत्रेदं विचारणीयं, किमत्र कारणं स्यात् ? येन वैदिक मतानुयायिनः प्राधान्येन वेदमेव आश्रयन्ति ? तत्र अनुशिलने कृते ज्ञायते यत् भगवन्तम् ब्रह्माणम् आरभ्य ये के च महर्षयः, मुनयः, आचार्याः आर्यावृत्ते संजाताः ते सर्वेऽपि **"भूत–भव्य–भविष्योपयोगिनां सर्व विद्यानां ज्ञानम् आकरग्रन्थाः वेदाः"** इति मेनिरे । वेदेशु यादृशम् सूक्ष्मं प्रत्यक्षाविषयिभूतं ज्ञानं विद्यते न तादृशं कुत्राप्यन्यत्र उपलभ्यते। अत एव भगवान् स्वायंभुवोमनुरब्रवीत्–

सेनापत्यं च राज्यं च दण्डनेतृत्वमेव च ।
सर्वलोकाधिपत्यं च वेदशास्त्रवित् अर्हति ॥

भूतं भव्यं भविष्यं च सर्वं वेदात् प्रसिध्यति ।
बिभर्ति सर्वभूतानि वेदशास्त्रं सनातनम्॥

तस्मादेतत् परं मन्ये यत् जन्तोरस्य साधनम् ।
पितृ–देव–मनुष्याणां वेदचक्षुः सनातनम्।
अशक्यमप्रमेयं च वेदशास्त्रमितिस्थितिः ॥ इति ॥

अन्यानि दर्शनशास्त्राणि वेदमुपजीव्य प्रवृत्तानि ।

शिक्षा–कल्प–व्याकरण–निरुक्त–छन्द–ज्योतिष–धर्मशास्त्र–पदार्थविज्ञान–साहित्य–कला–शिल्प–राजनीति–आयुर्वेद–धनुर्वेद–गांधर्ववेद–वास्तुशास्त्रादीनां ये ये आकरभूताः ग्रन्थाः सन्ति, ते सर्वेपि स्व स्व विषयस्य वेदमूलतां महता कण्ठेन उद्घोषयन्ति। किञ्चिदत्र उदाहरिष्यामः –

१. ज्योतिशाचार्यः आर्यभटः स्वग्रन्थान्ते ज्योतिःश्शास्त्रस्य वेदमूलातां प्रतिपादितवान्। **ज्योतिश्शास्त्रं षडंगेशु अन्यतममिति** ।

2. 'आयुर्वेदम् अथर्ववेदस्य उपांगम' इति सुश्रुतः ब्रवीति । **"इह खलु आयुर्वेदो नाम यदुपांगम् अथर्ववेदस्य"** इति

३. पदार्थविज्ञानशास्त्रस्य वैशेषिकशास्त्रस्य वेदमूलकत्वं प्रतिपादयति कणादः – **"तद्वचनात् आम्नाय्यस्य प्रामाण्यम्"** इति । अपि च शरीरं द्विविधं योनिजम्, अयोनिजं चेति विवृण्वन् वैदिकवचनमुपस्थापयति–

**ब्राह्मणोऽस्य मुखमासीत् बाहुराजन्यःकृतः
ऊरु तदस्य यद्वैश्यः पद्भ्यां शूद्रोऽजायत ॥** इति।

४. न्यायशास्त्रकारो गौतमोऽपि अतिन्द्रियविषयकं विज्ञानं प्रतिपादयन् वेदभागस्य प्रामाण्यं निर्दिशन् ब्रवीति यत्, **"मन्त्रायुर्वेदप्रामाण्याच्च तत्प्रामाण्यम् आप्तप्रामाण्यात्"** इति।

मन्त्रेषु आयुर्वेदः प्रत्यक्षविषयीभूतः उपदिश्यते, तस्य आवितथं प्रामाण्यं लोकविज्ञातम्। तस्य प्रामाण्यात् अतीन्द्रियविषयज्ञानप्रतिपादकस्यापि वेदभागस्य प्रामाण्यम्।

स्त्य्येवं सर्वविद्यानाम् आकरभूतान् वेदान् वैदिकधर्मानुयायिनः प्राणादपि प्रियान् सञ्जानते । किमत्र आश्चर्यम् ?

संप्रति वेदार्थविषयमवलम्ब्य किञ्चित् उच्यते –

तस्मिँश्च वेदे द्वौकाण्डौ–कर्मकाण्डः, ज्ञानकाण्डश्चेति। उपनिषद्भागो ज्ञानकाण्डः। तद्भिन्नः ब्राह्मणार्ण्यकसंहिताश्चेति कर्मकाण्डः। तत्र आधानाग्निहोत्रदर्शपूर्णमासादि कर्मणः एव प्रतिपाद्यत्वात् । वेदांगज्योतिषेऽपि उक्तं– **"वेदा हि यज्ञार्थमभिप्रवृताः"** इति । सत्येवं वेदानां प्रयोजनं यज्ञ सम्पादनमेव ? नहि । प्राचिनैः महर्षिभिः यत् उद्घोशितं सर्व विद्यामुलकं वेदानाम् – **"वेदाः सर्वविद्यानाम् आकर ग्रन्थाः इति"** ।

सा च मन्त्राणाम् अनेकार्थता न स्वच्छन्दसा आश्रयितुं शक्या । किन्तु प्रतिपाद्य विषयभेदात् सर्वत्र व्यवस्था वर्तते – सा च व्यवस्था प्राचीनैः महर्षिभिः त्रिविधप्रक्रियानुरूपा व्यवस्थापिता । तदनुसारं मत्राणां याज्ञिकः एको अर्थः । आधिदैविको द्वितीयः । आध्यात्मिकः तृतीयः । महर्षयो वैदिकाश्च त्रिविधम् अर्थं स्विकुर्वन्ति स्म इत्यत्र कानिचन प्रमाणानि प्रस्तूयन्ते – **'वाचं सुश्रुवाँ अफलाम् अपुष्पाम्'** इति ऋगर्थं व्याख्यायमानः निरुक्तकारः यास्कः भगवान् आह – अर्थं वाचं, पुष्पं फलम् आह – याज्ञदैवते पुष्पफले, देवता अध्यात्मे वा इति निरुक्ते॥

एतेन दैव्यावाचो वेदस्य याज्ञिकाधिदैविकाध्यात्मिकाः त्रिविधाः अर्थाः भवन्ति इति विस्पष्टम् उच्यते ।

भगवान् यास्कः न केवलं प्रतिज्ञामेव कृतवान्, अपितु निरुक्ते व्याख्यायमानानां सर्वेषामपि मन्त्राणाम् आधिदैवीव्याख्यानं कुर्वन् सर्वमन्त्राणाम् आधिदैविकार्थः एव प्रधानभूतः ज्ञापयति । अनेकत्र आद्यात्मिकार्थं याज्ञिकार्थं च प्रतिपादयति। यथा – **"एकया प्रतिधापिबत् साकं सरांसि काणुका"** अस्याः ऋचः व्याख्याकुर्वन् आह –

तत्रैतद्याज्ञिका वेदयन्ते त्रिंशदुक्थपात्राणि मध्यन्दिने सवने एकदेवतानि। तान्येतस्मिन् काले एकेन प्रतिधानेन पिबन्ति। तान्यत्र सरांस्युच्यन्ते। त्रिंशदपरपक्षस्य आहोरात्राः, त्रिंशत् पूर्वपक्षस्येति नैरुक्ताः। या एताः चान्द्रमस्यः आगामिन्या आपो भर्मन्ति रश्मयः ता अपरपक्षेपिबन्ति । इति।

अपि च **"यत्रासुपर्णाः"** इति मन्त्रव्याख्याने स आह यत्र सुपर्णः सुपतनाः आदित्य रश्मयः इत्याधिदैवम्। अथाध्यात्मम् – यत्र सुपर्णाः सुपतनानि इन्द्रियाणि – इत्यात्मगतिमाचष्टे । इति ।

अन्यदापि – **"स्प्तऋषयः प्रतिहताःशरीरे"** इति मन्त्रव्याख्याने आह –

सप्तऋषयः प्रतिहताःशरीरे, रश्मयः आदित्ये इति अधिदैवतम्। अथाध्यात्मम्– सप्त ऋषयः प्रतिहताः शरिरे, षडिन्द्रियाणि, विद्या सप्तमी आत्मानि इति आत्मगनिमाचष्टे। इति॥

एवमेव अन्यत्रापि अधिदैवतेन सह याज्ञिकम् आध्यात्मिकं च व्याख्यानं यास्केन प्रदर्शितम् । तेन यास्कमते मन्त्राणां त्रिविधोऽर्थः प्रामाणिकः इति सर्वथा विस्पष्टो भवति।

महाभाष्यदिपिकायाम् –**"इदं विष्णुर्विचक्रमे"** इत्यत्र विष्णुशब्दो अनेकशक्तिः सन् अधिदैवतम् अध्यात्मम्–अधियज्ञं च आत्मानि नारायणे चषाले च तया शक्त्या प्रवर्तते इति।

केषांचन मन्त्राणां बहुविधोऽर्थः पूर्वाचार्यैः प्रदर्शितः –

**"चत्वारिवाक् परिमिता पदानि"** इति ऋचः षड्विधोऽर्थः यास्केन प्रदर्शितः

Vijnana Bharati

– कतमानि तानि चत्वारि पदानि ? ओं कारो महाव्याहुतयश्चेति आर्षम् । नामाख्याते, च उपसर्गनिपातश्च इति वय्याकरणाः । मन्त्रः कल्पः ब्राह्मणं व्यावहारिकी चेति याज्ञिकाः। ऋचो –यजूंषि–सामानि–व्यावहारिकीति नैरुक्ताः । सर्पाणां वाक्, वयसां वाक्, क्षुद्रस्य– सरीसृपस्य, चतुर्थीव्यावहारिकीति एके । पशुषु – तृणवेषु– मृगेषु आत्मानि चेति आत्मप्रवादाः ।

एतदेव सर्वमभिसमिक्ष्य निरुक्तव्याख्याकारो दुर्गाचार्यः अनुपक्षीयमाण शक्तयो वेदशब्दाः यथाप्रज्ञं पुरुषाणाम् अर्थाभिधानेषु विपरिणममानाः सर्वतोमुखाः अनेकार्थानि प्रब्रुवन्ति । इति निरुक्तटीकायाम् ।

एतैः प्रमाणै विस्पष्टम्भवति – वेदः न केवलं द्रव्यमययज्ञार्थमेव प्रवृत्ताः ते हि सर्वविद्यानां सर्वविधविज्ञानानां च आकरभूताः सन्ति। तत्र आधिदैविकोअर्थः साक्षात् विज्ञानपर एव। सच बहुविधः। आध्यात्मिकोऽपि अर्थः त्रिधा विभक्तः–आत्म–शरीर–परमात्मसम्बन्धेन।

परिशिष्टो याज्ञिका र्थोऽपि अत्यन्तमहत्वभूतो विद्यते। तस्मादत्र नित्यत्वेन निहितानां श्रौतयज्ञानां लेशतो वास्तविक प्रयोजनम् उपवर्ण्यते।

आधानात् आरभ्य आसहस्रसंवत्सरं साध्याः श्रौतयज्ञाः अस्मिन् ब्रह्माण्डे सर्गारम्भात् आप्रलयं यावन्तो अतिन्द्रिया यज्ञाः अभूवन, प्रवर्तन्ते च तेषां स्वरूपं परिज्ञापनायैव प्रवृत्ताः । अस्मिन् विराट्पुरुषे प्राकृतिकतत्वैः ये यज्ञाः वितन्यन्ते तामेवाधिकृत्य पुरूषसुक्तस्येयं ऋक्–

**यज्ञेन यज्ञमयजन्त देवाः तानि धर्माणि प्रथमान्यासन् ।**
**ते ह नाकं महिमनः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ।।** इति।

आधिदैविक यज्ञ प्रतिपादिकेयं ऋक् यास्केनेवं व्याख्याता – **'यज्ञेनयज्ञमयजन्त देवाः', 'अग्निनाग्निमयजन्त देवाः'** अग्निः पशुरासीत् तमालभन्त तेनायजन्त, इति च ब्राह्मणम्। तानि धर्माणि प्रथमान्यासन् । तेन ह नाकं महिमानः संसेव्यन्त । यत्र पूर्वे साध्या सन्ति देवाः साधनाः। द्युस्थानो देवगणाः । इति नैरुक्ताः इति ।

यजुषि अपि उत्तम –अग्निः पशुरासीत् तेनायजन्त वायुः पशुरासीत् तेनायजन्त सूर्यः पशुरासीत् तेनायजन्त ।

यथा खलु संप्रति, भूगोल–खगोलयोः परिज्ञानाय तयोः विविधप्रकाराणि चित्राणि निर्मीयन्ते । यथा वा अतीन्द्रियां पूर्वतनीं कथां घटनां वा निदर्शयितुं रंगमंच नाटकानि आह्रियन्ते तथैव ब्रह्माण्ड विज्ञानं सम्पादयितुं श्रौतयज्ञानां विधानं प्रवृत्तम्।

तथाहि – अग्न्याधानाय प्रथमतो वेदिः निर्मीयते। वेदिनिर्माणे चेयं प्रक्रिया– यज्ञोपयोगिस्थानं निश्चित्य तद्भमिं किञ्चित् खनित्वा तत्र किञ्चित् जलप्रक्षेपः क्रियते। तदनन्तरं क्रमशः वराहविहिता मृत्, वल्मीकनपा, ऊषः, सिकताः, शर्कराः विकीर्य इष्टकाः सञ्चीय हिरण्यं निधाय समिधः संस्थाप्य अरणिं मथित्वा अग्निम् उत्पाद्य तत्र अग्नेराधानं क्रियते ।

इयं प्रक्रिया अग्न्याधानाग्निचयनयोः समाना

अत्र च विज्ञानम् – इयं पृथिवी महदण्डतः विभज्य स्वसत्तामलभत, यावत् पृथिव्याः पृष्ठे अग्नेः प्रादुर्भावः समजनि तावति काले सा भूमिः कां–कां, अवस्थाम् अतिक्रम्य अग्निसद्भावे समर्था अभवत् तत् संक्षेपः प्रदर्श्यते।

भूमेः उत्पत्तिविधानम् बहुधा ब्राह्मणोपनिषत्सु दृश्यते। तदेकम् अत्रोदारणम् – **"सश्रान्तस्नेपानः फेनमसृजत्"** । स श्रान्तः तेपानो मृदं, शुष्कापं, ऊषं, सिकतां, शर्करां, अश्मानं, अयोहिरण्यं, ओषधि–वनस्पत्यसृजत । आपो ह वा इममग्रे सलिलमेवास। स यद् उपहन्यते मृदेवभवति। यावद्वै वराहस्य चषालं तावतीयमेवाग्रे आसीत्। यद्वराहविहितमुमास्याग्निमाधत्ते। यद्वल्मीकवपामुत्कीर्याग्निमाधत्ते। तदूषानुपकीर्याग्निमाधत्ते। यत्सिकतामुत्क्याग्निमाधत्ते। यत शर्करामुपकीर्याग्निमाधत्ते। शिथिरा वा इयं अग्र आसीत्। तां प्रजापतिः शर्कराभिरदृंहत। येन द्यौ रुग्रा पृथिवी च दृढा। शर्करया अश्मानं, तस्मात शर्करा अश्मैव भवति इष्टका उपदधाति । अश्मानो लोहमुत्थितम्। हिरण्यं निधाय चेतव्यम् । इयं वा अलोमिकेवाग्र आसीत् ओषधिवनस्पतयो वै लोमानि। समिधमाधायाग्निं चिनुते । त्वामग्नेपुष्कराद्ध्यथर्वा निरमन्थत। ......... उदग्नि वृत्र हा जनि । निर्मथ्याग्निमादधाति। प्रथमतः अग्नेः प्रादुर्भावः वृक्षशाखानां संघर्षणेनैवाभवत्। (अद्यापि यैः यैः उपायैः अग्निमुत्पाद्यते, द्वयोः परस्परं संघर्षः एव अग्नेः उत्पादनेकारणम्।)

आधन प्रक्रिया हि जलसेकादारभ्य अग्निस्थापनपर्यन्तं कृत्स्ना प्रक्रिया सृष्टेः अवस्थाद्योतिका । एतेन विस्पष्टं भवति श्रौतयागाः प्राकृतयागानामेव प्रातिनिध्यं भजन्ते । एवमेव – अहोरात्रं दिनं, पक्षाः, मासाः, ऋतवः, संवत्सराणि । विद्युत् वृष्टिः चन्द्रमानक्षत्राणि । अन्नं–पुरुषः–रेतः एतेषां समेषां प्रातिनिध्यं भजन्ते उत्तरक्रतवः अग्निहोत्रादि सहस्र संवत्सर पर्यन्ताः ।

अहोमहदिदम् आश्चर्यकरं परमोपयोगि प्रयोजनं श्रौतयज्ञे । दृश्य वेदो हि श्रौतं कर्म ।

एवं श्रौतयज्ञानां सृष्टिविज्ञानमेव पृष्ठभूमिः । तस्मात् वेदानां विज्ञानमेव मुख्योऽर्थः ।

वेदार्थविचारार्थं प्रवृत्तमिदं व्यास–जैमिनीभ्यां प्रणीतं "मिमांसा दर्शनम् विंशति लक्षणात्मकम्। आद्वादशाध्यायं कर्मकांडम्– प्रथमे, विध्यादेः प्रामाण्यम्। द्वितीये, तद्विधेः कर्मभेदः। तृतीये, विहितानां कर्मणां शेष–शेषिभावः। चतुर्थे, ऋतुप्रयुक्तानुष्ठेय पदार्थानां पुरूषार्थप्रयुक्तानुष्ठेयपदार्थानां च परिमाणचिन्तनम्। पञ्चमे, अनुष्ठेयपदार्थानाम् अनुष्ठान क्रमो निरूपितः। षष्ठे, विहितकर्म–फलभोक्तृत्वरूपाधिकारी निरूपणम्। सप्तमे, प्रकृतौ उपदिष्टानामंगानां सामान्यातिदेशः निरूपितः। अष्टमे, द्रव्यदेवताद्वारेण विशेषातिदेशो निरूपितः। नवमे, प्रकृतौ उपदिष्टानां मन्त्र–साम–संस्कारकर्मणां विकृतौ उपदिष्टानां देवतादि वाचकस्य पदस्याध्याहारः ऊहो निरूपितः। दशमे, विकृतौ चोदकप्राप्तानां पदार्थानां मन्त्राणां च निरवकाशानां, विकृतौ उपदिष्टविशेषांगादिना बाधः निरूपितः। एकादशे, एकांगिविधिप्रयुक्तानाम् अंगानां तन्त्रं निरूपितम्। द्वादशे, एकांगिप्रयुक्तस्य अंगस्य अग्यन्तरेऽपि उपकाररूपः प्रसंगः निरूपितः ।

एवम् द्वादशासु अध्यायेषु कर्मकाण्डं निरूप्य श्रौत–स्मार्त–लौकिक–व्यवहारोपयोगिनां सहस्राधिक न्यायानां प्रतिपादनं कृतमस्ति सूत्रभाष्यवार्तिककारैः ।

अत्र कानिचनोदाहरणानि :– सामिधेनि न्याय्यः स्मार्ते कर्मणि जप–ब्रह्मयज्ञादिषु प्रथम–मन्त्रोच्चारणे अनुसन्धीयते । गृहैकत्वंन्याय्यः, कपिञ्जलाधिकरणं न्यायः इत्यादयः श्रौते कर्मणि बहुधा आद्रियन्ते । लौकिकव्यवहारे तन्त्रप्रसंगौ च सर्वत्र दरीदृष्येते– यथा एकवारं बहिर्गतः सन् पुरूषः बहूनि कार्याणि कृत्वागमिष्यति तत् गमनागमनयोः बहुनां कार्याणां तन्त्रं सुस्पष्टमेव । एव मेव प्रसंगस्यापि अतिथिभोजनार्थं कृतेन पाकेन गृह–परिवार–कर्मकरादीनामपि यदा भोजनं भवति तत् प्रसंग सिद्धिः । एवमन्यत्रापि ऊह्यम् ।।

त्रयोदशतः षोडषाध्यायपर्यन्तम्–यद् तत् **"संकर्षकाण्डम्" "देवताकाण्डम्"** इति वा प्रकीर्त्यते ।

द्वादशाध्यायेषु–अवशिष्टानां चिन्तनयोग्यानाम् अंशानां संकृष्य–संकृष्य विचार्यते इति **संकर्षकाण्डम्** इति। अथवा पूर्वनिरूपितानां कर्मणां देवताविषयं विविच्य निरूप्यते इति **देवताकाण्डं** इति च प्रसिद्धिः । यथा–अग्निमग्न आवह इति देवता आवाहने अग्निशब्दस्य द्विवारं कीर्तनं भवति तत्र प्रथमोऽग्निशब्दः आग्नेयमष्टाकपालमित्यादि निरूपितः कर्मदेवता

Vijnana Bharati

अग्नेर्वाचकः। द्वितीयोऽग्निशब्दः तत्तदेवताभ्यो हवींषि प्रापकः हुताशनसंज्ञकः आहवनीयोऽग्निः एवमादि। अतः **देवताकाण्डमिति** ॥

तत्र च प्रथमाध्याये आदितः त्रयोदशे, अनुवषट्कार-पत्नीसंयाज-यूप-पितृयज्ञ सम्बद्धः विचारः निरूपितः द्वितीयाध्याये, आदितः चतुर्दशे, इष्टका-होम-अवदान-प्रैषादि सम्बद्धः विचारः निरूपितः। तृतिये-आदितः पञ्चदशे अनुष्टेयः कालः, आधानादिषु अग्निपदादिपदवाच्या देवता, ग्रहविचारः, आर्षेय-वरणादिकं चिन्तितम् । चतुर्थे-आदितः षोडषे सामिधेनी-निगद-वषट्कारादिनां विचारो निरूपितः ।

एवं अवषिष्टांशानां देवतानां च विचारोत्र प्रवृत्तः अनुष्ठान सौकर्याय उपासनायेति उपासावाकाण्डमित्यापि व्यवहियते।

धर्मार्थकाममोक्षाः खलु पुरूषार्थाः तेषु मोक्षः परमपुरूषार्थः तत्प्राप्त्यर्थं धर्ममार्गो उपदिष्टः । धर्मानुष्ठानेन चित्तशुद्धिः। तेन च मोक्षसधनमार्गः नाम ज्ञानमार्गः सुकरो भवति। अतः वेदार्थविचारात्मके मीमांसा-शास्त्रे आदितः आषोडषं कर्मकाण्डम् - उपासना कांडं च निरूप्य अवशिष्टेषु चतुर्षु अध्यायेषु ब्रह्मचिन्तनं प्रवर्तते **"अथातो ब्रह्मजिज्ञासा"** इति । ब्रह्मप्राप्तिः ज्ञानेनैव भवतीति **ज्ञानकाण्ड**मिति अस्य नाम ।

अत्र प्रथमाध्याये-आदितः सप्तदशे, सर्वज्ञसर्वशक्तिब्रह्म जगतः कारणं इति प्रतिपादितम्। द्वितीये-आदितः अष्टादशे स्मृतिन्यायाविरोधपरिहारः, परदर्शनानां च तर्काभास विजृम्भितत्वम्, सृष्टिश्रुतीनां परस्परं विप्रतिपत्ति-समाधानमिति अर्थ जातं प्रतिपादितम्। तृतीये आदितः नवदशे,-पञ्चाग्नि-विद्यामाश्रित्य संसारगतिप्रभेदः प्रदर्श्यते वैराग्यार्थम्। नाम परापरविद्यास्वरूपविशेषविचारः क्रियते। चतुर्थे-आदितः विंशे फलचिन्ता वृत्ता । आत्मा वा अरे द्रष्टव्यः श्रोतव्यः मन्तव्यः, निधिध्यासितव्यः इति । सोऽन्वेष्टव्यः जिज्ञासितव्यः इत्यादिस्वरूपेण। अत्रैव अन्तिमे सूत्रे - **"अनावृत्ति श्ब्दात्, अनावृत्ति शब्दात्"** इत्यनेन ये च साक्षात् परमात्मानं प्राप्तुं स्थिताः तदाराधनतत्पराः तेषां सर्वेषाम् अनावृत्तिः इति निरूपितम् ।

एवं च अग्न्याधानप्रक्रियया महदण्डतः भूमेः पृथग्भवनादारभ्य तैस्तैर्विधानैः पुनस्तत्रैव विलयन पर्यन्तं समग्रं सृष्टिविज्ञानं यत् वेदे निहितम्।

किन्तु तदन्वेषण तत्पराः आबहोकालात् यतमानाः लौकिकविज्ञानिनः अद्ययावत् चरमसीमां गन्तुं नाशक्नुवन् । तस्मादत्र वेद एव शरणम् ।

**प्रत्यक्षेणनुमित्यावा यस्तूपायो नबुध्यते ।**
**एतं विन्दन्ति वेदेन तस्मात् वेदस्य वेदता ॥**

॥ इतिशम् ॥



Vijnana Bharati